CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

தனி ப்ரதி
விலை ரூ. 4
JANUARY 2017

संस्कृतविद्यासमिति-पत्रिका

# संस्कृतश्रीः

# ஸம்ஸ்க்ருதஸ்ரீ:

# Samskritasri

A Monthly Journal of
Samskrit Education Society

ஸம்ஸ்க்ருத கல்விக்
கழகம் மாத இதழ்,
212/13-1 செயிண்ட்
மேரிஸ் ரோடு
மந்தைவெளி
சென்னை-28

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

( 24951402

ஓ

# THE SAMSKRIT EDUCATION SOCIETY (Regd) MADRAS

Old 212/13-1, New No.11, St. Mary's Road, R.A. Puram, Chennai - 600 028.

President : Vaidya Sri S.V. Radhakrishna Sastri

Secretary & Treasurer : Sri G. SITHARAMAN, F.C.A.

Editor and Publisher : S. SRINIVASA SARMA
Samskritasri
34, Senthamil Nagar,
Near : Indra Nagar & New Railway Station
Big Kancheepuram - 631 502
Cell No. 07402763830

பாடங்கள் நடத்துபவர்கள் :

| | | | |
|---|---|---|---|
| 1. | ஸ்ரீமதி சாந்தா ஸ்ரீநிவாஸன், | ஆழ்வார்ப்பேட்டை | 24353597 |
| 2. | ஸ்ரீமதி மாலதீ பாலசுப்ரமண்யம், | மேடவாக்கம் | 9884158110 |
| 3. | ஸ்ரீமதி சாந்தி அசோக் | மந்தைவெளி | 24951402 |
| 4. | ஸ்ரீமதி கௌரீ கருணாகரன், | மைலாப்பூர் | 2432054[illegible] |
| 5. | ஸ்ரீமதி ரமாசுந்தரராஜன், | சென்னை-95 | 6568[illegible] |
| 6. | ஸ்ரீமதீ பார்வதீ ராமசந்திரன் | அண்ணா நகர் | 262[illegible] |
| 7. | ஸ்ரீ R. முத்து கிருஷ்ணன் | கொரட்டூர் | 268[illegible] |
| 8. | ஸ்ரீ S. ரங்கநாத சர்மா, | சேலையூர் | 222[illegible] |
| 9. | ஸ்ரீமதி புவனேச்வரீ | ராஜகீழ்பாக்கம் | 984121[illegible] |
| 10. | ஸ்ரீ K. ராஜேச்வரீ | மாடம்பாக்கம் | 9962837319 |
| 11. | ஸ்ரீ S. ஹரிஹரன் | நங்கைநல்லூர் | 9841403859 |
| 12. | ஸ்ரீ S. அனந்தன் | மதுராந்தகம் | 9894709418 |
| 13. | ஸ்ரீ P.R. சுப்ரமண்யம் | K.K. நகர் | 23640864 |
| 14. | ஸ்ரீ N. ஜானகீ ராமசாஸ்த்ரீ | I.T.I. கிண்டி | 24953144 |
| 15. | ஸ்ரீ R. ஸ்ரீநிவாஸகோபாலாசார்ய | ஸ்ரீரங்கம் | 2430632 |
| 16. | ஸ்ரீமதீ ராஜம் சுந்தர் | திருநெல்வேலி | 9488326850 |
| 17. | ஸ்ரீ T.V. ஸ்ரீநிவாஸ தாதாசார்ய | காஞ்சீபுரம் | 27269153 |
| 18. | ஸ்ரீ P.D. ஸ்ரீநிவாஸன், | திருநின்றவூர் | 9445703470 |
| 19. | ஸ்ரீ R. ரங்கநாதன் | காஞ்சீபுரம் | 97910 55428 |
| 20. | ஸ்ரீ C.A. ஏகாம்பரம் | கோயம்புத்தூர் | 0422-2233242 |
| 21. | ஸ்ரீமதி டி.வி. ஜயலக்ஷ்மி சர்மா, புன்குன்னம், த்ரிசூர்-680 002, | | 0487-2382964 |
| 22. | ஸ்ரீமதி கௌரிவேங்கடராமன், காட்கோபர், மும்பை (E) | | 09757115154 |
| 23. | ஸ்ரீ V. கோதண்டராமன், Mrs. கீதா ரேகா, | ஆதம்பாக்கம், சென்னை | 9444469638 |

Text Composing at : V.K.N. Enterprises, 9840217036



CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

# संस्कृतश्रीः

माला: : 39 January-2017 पुष्पम् 3

कलि : 5109 दुर्मुखि-कुम्भमासे 39—3

The Samskrit Education Society Established with the blessings of His Holiness SRI MAHASWAMIGAL of Kanchi Kamakoti Peetam in the year 1957.

**OFFICE:**

Old 212/13-1, St.Mary's Road, Mandaiveli, Chennai - 600 028.

**PRESENT ACTIVITIES**

1. Assisting study of Sanskrit.
2. Publication of books and monthly journal SAMSKRITASRI.

SAMSKRITASRI
Founder Editor
Vaidyasri
S.V. RADHAKRISHNA SASTRI,
Hon. Editor.
**Dr. N. VEEZHINATHAN**

Editor and Publisher
Dr. S. SRINIVASA SARMA

***Hon. Academic Advisors :***
Dr. K. SRINIVASAN,
K.S.R.I. Chennai

Smt. Santa Srinivasan
SES, Chennai

**Associate Editors :**
Pandit S. Ranganatha Sarma, Chennai
Prof. G. Srinivasu, Kanchipuram
Prof. C.V. Seshadri, Chidambaram

१. श्री ललितास्तुतिः (तोटक छन्दः) ... ४

२. महाभारते वैज्ञानिकांशाः । ..... ७

३. शिवभारतशतकम् । ..... १४

४. शब्दविमर्शः -
भू धातोरनेकार्थकप्रयोगाः । ... १७

५. रघुवंशे द्वादशसर्गे द्वादशः श्लोकः २०

६. बालबोधः । ..... २४

७. करुणामृतम् । ..... २६

८. हे दुर्योधन दुर्मते नृपपदे
त्रातुं स न त्वाऽशकत् ..... २९

9. Sanskrit Prosody ..... 31

१०. रामाष्टपदी ..... ३६

**SUBSCRIPTION RATES**

| | |
|---|---|
| ANNUAL : | Rs. 40/- |
| LIFE SUBSCRIPTION | Rs. 400/- |
| Page Donation | Rs. 200/- |

Subscription and donations may be sent in the form of crossed D.D./Drawn in favour of the Secretary and Treasurer,

"DD/Cheque should be sent by Speed Post only"

The Samskrit Education Society (Regd.) .
Old 212/13-1, St.Mary's Road, Mandaiveli,
Chennai - 600 028. Ph: 044-2495 14 02
**samskritasri@gmail.com**



CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

*Sri Bangaru Kamakshi, Tanjore*

# श्री ललितास्तुतिः (तोटक छन्दः)

—Dr. G.P. Ravi Dedar (West), Mumbai

करुणालय - भासुर - नित्यमये।
कमलासन - भासुर - नित्यमये ।
कविपुङ्गव - कूजित - कीरकरे ।
परिपालय मां ललिते सततम् ।। १ ।।

(Oh Mother, You are permanent, You are shining in the temple of Grace. You are of Golden hue and worshipped by Lord Brahma. (It is said that the God of creation was given a statue of Golden Kamakshi Devi for his worship, created by Devi Herself from Her third eye, as per Kanchi Mahatmiyam. This form is presently consecrated in Thanjavur. This statue was originally part of Kanchi Sri Kamakshi temple. However, fearing invasion by marauders like Muslim ruler Hyder Ali, the ancestors of Sri Syama Sastriand other priests brought Her to Tanjore, after temporary stay at chenji fort, Udayarpalayam and Tiruvarur. She is called Bangaru Kamakshi. Bangaru in Telugu means gold. She was Worshipped by all music trinities, Sri Syama Sastri, Sri Muthuswami Dikshitar and Sri Thyaga Brahmam. She is the favourite deity of Sri Syama Sastri. Most of the songs of Sri Syama Sastri was on this deity. One can feel deep devotional fervour in his songs on Kamakshi. Many times the Saint was



CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

gifted with Her Vision. Little wonder, that his songs echo with heights of ecstasy, depths of devotion.

You are holding a beautiful parrot in your hand and your glory is sung by the Koels called poets. Oh Mother Lalite, protect me ever).

गुरुमण्डलशोभित - तत्वनिधे ।
गुणवर्जित - चिन्मय - सत्वनिधे ।।
गुहकुञ्जर - लालन - मातृशिवे ।
परिपालय मां ललिते सततम् ।। २

(You are the treasure trove of philosophy. You ever shine in the Guru mandala, a mystical pantheon of highest Teachers(which is considered a very important part of Devi worship). You are without three Gunas(You are beyond the gunas). You are of pure Intellect form. You are the veryessence of Satva. You,the ever auspicious Mother, delights in caressing your dear children, Sri Ganesha and Skanda. Oh Mother Lalite, protect me ever).

मणिमण्डित – नूपुर – हंसगते ।
मदनादि – सुपूजित – कामकले ।।
मधुसूदन – वन्दित – विश्वमये ।
परिपालय मां ललिते सततम् ।। ३ ।।

(You Walk like Hansa bird with feet adorned with nupura containing beautiful beads, You are the Kamakala, worshipped by God if Love(she is the creatrix of this universe. Hence called Kamakala. Manmatha, God of love is one of the Devi upasakas or worshippers. The others are Lord Shiva, Vishnu, Brahma, Skanda, Lopamudra(wife of sage - gastya), gastya, Indra, -gni, Manu, You are of the form of the universe and worshipped by Lord Vishnu. Oh Mother Lalite, protect me ever)



CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

शशिभास्कर – कुण्डल – शोभिमुखे
शशिषोडश – वर्ण – विभूतिमये ।।
शशिशेखर – सङ्गत – कल्पलते ।
परिपालय मां ललिते सततम् ।। ४ ।।

(You are adorning as your ear rings both Sun and the Moon. You are shining resplendent with all the 16 digits present in the full moon.(It is said that Devi is present in the rays of a full moon. Hence, She is specially worshipped on all the full moon days by Devi Upasakas). You are the very wish yielding kalpa Creeper, surrounding the form of Lord Shiva, Who is adorned by the moon on His head. Oh Mother Lalite, protect me ever.)

शरणागत – भक्त – सुपोषरते ।
परमोत्सव – मङ्गल – मोक्षकरे ।।
जननि त्रिपुरे कमले सकले ।
परिपालय मां ललिते सततम् ।। ५ ।।

(Your are the embodiment of auspiciousness. You eagar to protect your devotees who have taken refuge under You. You are the bestower of auspiciousness, happiness and final beatitude. You are my Mother, who reside in all three cities or states (in Vedanta, waking state called as Jagrut, dream called as Swapna and deep sleep, called as sushupti are explained as three states through which each jiva undergoes during his lifetime and the same is wrapped by Maya or illusion. Only when the screen of Maya is removed, a person attains realisation of self. He realises that his real nature is nothing but Brahman. Devi as Mahamaya, is present in all three states and one requires Her Grace to go beyond all these states to attain the blissful state). You are lotus faced. You are of the energy form. Always protect me, oh Mother, Lalite)



CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

# महाभारते वैज्ञानिकांशाः ।

—विद्यावारिधिः , निष्ठल सुब्रह्मण्य शास्त्री, पोचूर,

भारतीयानां संस्कृतिः अनादिर्महत्तमा च । ऋषयः दीर्घदर्शिनस्सन्तः समस्तं प्रपञ्चं पावयितुं एतां दिव्यां संस्कृतिं सृष्टवन्तः । सर्वे मानवा; सौभ्रात्रेण सौमनस्येन च वर्तमानाः आध्यात्मिकसाधनां कृत्वा मुक्तिमाप्य दिव्यमानन्दमनुभवेयुरिति सौजन्यपूर्णानां तेषामाशयः । अत एतादृश्याः संस्कृतेर्निरूपणाय धर्माविबोधनाय च भगवान् व्यासमहर्षिः महाभारतं व्यरीरचत् । धर्मार्थकाममोक्षाणां एकत्र प्रतिपादकत्वेन महाभारतं विशिष्टं स्थानमाक्रामति साहित्यप्रपञ्चे ।

न केवलं काव्यलक्षणानां धर्मिकांशानामेव वा प्रदर्शनमत्र कृतं महर्षिणा, सर्ववैज्ञानिकांशानां सिद्धान्ता अपि अत्र स्थापिताः । महत्त्वात् भारवत्वाच्च महाभारतमुच्यते इत्युक्तम् । सर्वे वेदा एकत्र, महाभारतमेकत्र चेत् महाभारतमेव गरीयो भवति । अत्र निरूपिता विषया एव आप्रलयं प्रपञ्चं व्याप्नुवन्ति, अत्र यत्तु न निरूपितं तत्प्रपञ्चे न विद्यत एव । इममेवांशमित्थं प्रत्यपादयन्महर्षिसत्तमः - 'यदिहास्ति तदन्यत्र यन्नेहास्ति न तत् क्वचित्' ।

एतां प्रतिज्ञां सिसाधयिषुर्महर्षिवरेण्यः अद्भुतरीत्या वैज्ञानिकांशान् भाविनि काले जनिष्यमाणानपि निचिक्षेप महाभारते । दिव्यदृष्टयः खलु महर्षयः । तादृशवैज्ञानिकांशानां प्रतिपादनं कथं पुरातनगाथायां कृतं महात्मनेति परिशीलनमद्य क्रियते ।



CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

प्रथमतः प्रकृतिविज्ञानं कथं कथायामुपक्षिप्तं व्यासेनेति परिशीलयामः । ग्रीष्मान्ते मेघाः, वर्षणानि ऋतुपवनाश्च एतत्सम्बन्धि अन्यच्च कथायामेव बिद्यन्ते ।

पाण्डवाः प्राचीमेघाः । एते खलु श्वेताः । एतेषां मेघानामधिपः इन्द्रः । कन्याराशिना महाभागा द्रौपदी सूच्यते । उत्तरानक्षत्रद्वितीयतृतीयचतुर्थपादाः हस्तायाः चत्वारः चित्रायाः द्वौ पादौ आहत्य कन्याराशिर्भवति । कन्यायां सूर्यप्रवेशात् प्राचीमेघाः आगच्छन्ति । उत्तराया आरभ्य विशाखान्तानि पञ्च नक्षत्राणि पञ्च पाण्डवा इति कथयन्ति । पाण्डवाः गिरिषु अरण्ये सञ्चरन्ति स्म, मेघा अपि गिरिषु अरण्ये सञ्चरन्ति । पाण्डवानां समीपस्था भूमिः तृणकाष्ठजलसमृद्धा भवति । प्राचीवर्षाधिपः इन्द्रः । श्वेतमेघ एव ऐरावतः । रव्यनुग्रहात् कुन्त्याः कर्णो जातः । रविर्यदा प्रविशति कन्याराशिं तदा वर्षणं भवति । वर्षणं च कर्णः । अनूराधामारभ्य कृत्तिकान्ता तारा एव कौरवा इति ज्ञेयम् । सर्वेषां नक्षत्राणां राशिचक्रे सम्बन्धात् कौरवपाण्डवयोः सख्यं वर्णितम् ।

उत्तरादि विशाखान्ताः पञ्च ताराः ईशान्ये-ऋतुपवनाः । एते पाण्डवा इत्युक्तमेव । कृत्तिकादिपुष्यान्ताः ताराः नैऋतिऋतुपवनाः । ईशान्यपवनैः नैर्ऋतिपवनाः तिरोगमनं प्रापिता भवन्ति । अत एव पाण्डवैः कौरवाः जिता इति ।

कौरवानां अक्षौहिणीनां सङ्ख्या एकादश । पाण्डवानामक्षौष्यिः सप्त । आहत्य अष्टादश । अश्विन्यादिपुष्पातास्ताराः एकादश । उत्तरादिज्येष्ठन्ता; सप्त । आहत्य अष्टादश । एवं नक्षत्रैः प्राची-प्रतीची - पवनाः



CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

अक्षौहिणीसङ्ख्या च सूचिताः । एवं आकाशे प्रकृतिरहस्यानि सूचितानि । अयं कश्चन वैज्ञानिकांशः ।

Robert Hoser Heemar महाशयः अणुविक्षेपं (Atom bomb) परिशोधनेन महता ज्ञात्वा प्रपञ्चे प्रकटीचकार प्रथमतः । सः एकोनविंशशताधिकचतुःपञ्चाशत्तमे वत्सरे जुलै मासे षोडशाङ्के दिने Alamogordo air Base इति प्रदेशे सभायां भाषमाणः गीताश्लोकमुदाहृत्य सहस्रसूर्यकान्तिः परमेश्वरस्य नाम परमात्मनः अस्तीति श्लोकः । एवं प्रकटीकृत्य स एव श्लोकः मम स्फूर्तिप्रदाता इति प्रशशंस । स च गीताश्लोकः महाभारते विद्यते ।

महाभारते मृत्युसिद्धान्तः प्रकटीकृतः 'जातस्य हि ध्रुवो मृत्युः ध्रुवं जन्म मृतस्य च' इति । इमं वैज्ञानिकांशं ब्रिटिष्सिंहासनारूढः Charles अङ्गीचकार ।

दीर्घतमः पात्रद्वारा अनारोग्ययुक्तानां गवां चिकित्साविधानं सर्वमपि निरूपितवान् व्यासमहर्षिः । अश्वविद्यायां निपुणं नकुलं प्रदर्श्य अश्वचिकित्सां विशदीचकार । सहदेवः विराटराजं प्राप्य वृषभमूत्रघ्राणनेन वन्ध्या गौरपि यथा वत्सं प्रसूते तथाऽहं करोमीति जगाद । अनेन वचनेन तस्मिन् काले एतादृशी चिकित्सा अवर्तत इति ज्ञायते ।

वृक्षलतादीनामपि श्रवणघ्राणादिः पञ्चेन्द्रियव्यापारात्मिका शक्तिरस्तीति निरूपितं ऋषिणा । तेषु वृक्षादिषु आकाशस्य सत्त्वात् पुष्पफलोत्पत्तिः, पत्राणां त्वचां च ग्लानतायाः दृश्यमानत्वात् तेजसः सत्त्वं चानुमीयेते । शिथिला भवन्तीति हेतोः स्पर्शः, मेघगर्जनैः पुष्पफलानि पतन्तीति चर्यया



CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

श्रवणशक्तिः अङ्गीक्रियते । दूरे स्थिता लताः आलम्बनाय वृक्षमुपसर्पन्तीति दृष्टिगन्धद्रव्यैः धूपैश्च वृक्षामया नश्यन्तीति घ्राणशक्तिः, जलग्रहणेन रसनेन्द्रियशक्तिश्चः, ज्ञायन्ते ।

## सीसादिनिर्मितपात्रेषु गर्भपोषणं अण्डपोषणेन करणम्

स्त्रियः अण्डं पुंसो बीजकणं च संयोज्य कलदीकरणपद्धतिः आधुनिकैः क्रियते । एषा पद्धतिः फलभागिति विदेशेषु दृश्यते । वैज्ञानिकानां प्रयोग एषः । अयं वैज्ञानिकांशः व्यासेन महाभारते द्वापरयुग एव निरूपित इत्याश्चर्यजनकम् ।

गर्भवती हि गान्धारी, 'अद्यापि पुत्रा न सञ्जाता' इति वेदनया गर्भमाहतवती । तस्याः गर्भात् मांसपिण्डः बहिरागतः । व्यासस्तु तन्निरीक्ष्य तं पिण्डं एकाधिकशतभागान् कृत्वा घृतपात्रे संस्थाप्य पात्रं जलेन स्नपयामास । वत्सरपर्यन्तमेवं कृते तस्मात् शतं पुत्राः एका पुत्रिका च जाताः । एषा पद्धतिः आधुनिकैः Testtube Baby Method इत्युच्यते ।

आधुनिककाले स्त्रियः, पुरुषाः भवन्ति तत्र तत्र चिकित्सया । द्रुपदस्य राज्ञः शिववरात् दुहिता सञ्जाता । पुरुष इव वेषधारणे पोषिता । अन्ये पुरुष इति धिया सुतां दत्त्वा विहाहं चक्रुः । स्त्रीति ज्ञात्वा सर्वे रुष्टाः । तादृश शिखण्डिनी मरणैकनिश्चया विपिनं गतवती । सर्वं ज्ञात्वा दयालुः कश्चन यक्षः स्वपुंस्त्वं दत्त्वा स्वयं स्त्रीत्वं स्वीचकार । एषा गाथा स्त्रीपुंसोः लिङ्गपरिणामात्मकं वैज्ञानिकांशं सूचयति पञ्चसहस्रवत्सरेभ्यः प्रागेवेति विस्मयः ।

ऋतुदिनादारभ्य चतुर्दशे दिने स्त्रीणामण्डं बहिर्भवतीति अधुनिकवैद्या वदन्ति । एतादृशः वैज्ञानिकांशः महाभारते प्रागेव



CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

व्यासेन प्रोक्तः। स च कथमिति परिशील्यते।

पुरा व्युषिताश्वो नाम राजा बभूव। सः अपत्यरहित एव ममार। भार्या भद्रानाम्नी 'हे भर्तः। सन्तानं देहि अन्यथा अहमपि सहगमनं करोमी'ति रुरोद। तदा आकाशवाणी ऋतुशुद्धिदिनात् चतुर्दशे दिने शुद्धा सती शय्यायां स्वपिहि। स्वापसमये मां स्मर सन्ततिर्भविष्यतीत्याह। भद्रया तथा कृते सन्ततिर्जाता।

**आधुनिकानां क्षिपण्यः भारत एव अवर्तन्त इति निरूपणम्**

द्रोणाचार्यप्रयुक्ते पद्मव्यूहे गमनमेव वरं ज्ञात्वा अभिमन्युर्जगाम। धर्मराजादीन् अभिमन्युसहायकान् शिववरेण रुरोध सैन्धवः। मायया अभिमन्युं हतवन्तः कौरवाः। तद्ज्ञात्वा प्रज्वलितः अर्जुनः बालघातिनं सैन्धवं श्वः सूर्यास्तमयात् प्रागेव हनिष्यामि इति प्रतिजज्ञे। तथैव श्वः पाशुपतास्त्रेण सैन्धवस्य शिरश्चखण्ड गाण्डीवी। शिरः भूमौ मा पततु इति श्रीकृष्णवचनेन पाशुपतास्त्रेण स्यमन्तकक्षेत्रे तपस्यतः अर्घ्यं दातुमुद्यतस्य सैन्धवस्य पितुः अञ्जलौ पातितः। तच्छिरो भूमौ त्यजन् मृतो वृद्धक्षत्रः। स्यमन्तपञ्चकं कुरुक्षेत्रात् बहु दूरे वर्तते। बाणप्रयोक्ता अर्जुनो न पश्यति। तथापि तदुद्दिश्य बाणक्षेपणं आधुनिक-क्षिपणीप्रयोगं किं नानुकरोति?

**भूमिस्पर्शं विना वाहनानां गमनम्–**

जपान्देशे वाहनानि चलन्त्यपि भूमिं न स्पृशन्ति इति श्रूयते। द्रोणाचार्यमरणसमये 'अश्वत्थामा हत इति धर्मजेन कथनप्रसङ्गे



CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

'तस्य पूर्वं रथः पृथ्व्याः चतुरङ्गुलमुच्छ्रितः
बभूवैवं च तेनोक्ते तस्य वाहाः स्पृशन्महीम्' द्रोण.पर्व.५६

इत्यस्ति।

महाभारते यन्त्रनौकाः—

आधुनिककाले यन्त्रनावः बह्वयः दृश्यन्ते नदीतरणेषु समुद्रतरणेषु च। एतद्विचित्रं भवति यत् एतादृश्यः यन्त्रनौकाः महाभारतेऽपि वर्णिता इति।

लाक्षागृहदहनानन्तरं पाण्डवा गङ्गां यन्त्रनैकाभिः तेरुः इति वर्णितम्। यथा—

श्लो :- पार्थानां दर्शयामास मनोमारुतगामिनीम्।
सर्ववातसहां नावं यन्त्रयुक्तां पताकिनीम्॥

अधिकमारुतप्रसारेऽपि स्थिरां यन्त्रयुक्तां नावं दृष्ट्वा तया पाण्डवाः नदीं तेरुः॥

खगोलविज्ञानं महाभारते—

भीष्मः महाभारते खगोलविज्ञानं निरूपितवान् यदाधुनिकवैज्ञानिकज्ञानं संवदति। भाग्यनगरे नक्षत्रशालाधिकारी डा.बि.जि. सिद्धार्थः (Director of Birla Planitorium) एवं वदतीति हिन्दुपत्रिकायां जनवरी 12th, 2002 दिनाङ्कायां प्रकाशितम्। तद्यथा—

""Parasara explicitly expounds the length of the longest day and shortest day of the year which corresponds only to the latitude of 35 degrees."



CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

**मृतानां पुनरुज्जीवनम्—**

महाभारते तारकाक्षपुत्रः मृतजीवनं ययाचे शिवम्। शिवः 'कूपं सृष्ट्वा मृतान् तस्मिन् क्षिप जीविष्यन्ती'ति उवाच। एषा प्रक्रिया cloning विधानमनुकरोति। शरीरसौगन्ध्याय साधनानि (Perfumes) उपयुञ्जते। एतद्विवृणोति मत्स्यगन्धिचरितम्। भीष्मः धर्मजाय उपवासविधिं बोधयामास। एतत् आधुनिकैः प्रयुज्यमानं Dieting एव। भारते वर्णितायाः अक्षविद्यायाः आधारे Chess play जातम्।

एवं महाभारते वैज्ञानिकांशाः बहवः सञ्जाता इति निरूपितम्। विज्ञानखनिं व्यासमेवं स्तुमः -

'नमोऽस्तु ते व्यास विशालबुद्धे फुल्लारविन्दायतपद्मनेत्र।
येन त्वया भारततैलपूर्णः प्रज्वालितो ज्ञानमयः प्रदीपः'॥

इति शम्॥

----*----

साक्षात्सौति, गते दस्मिन्यथेच्छं परिगर्हते।
रथ्योदमिव दुर्गन्धि पत्नात्तं परिवर्जयेत्॥

நேரில் காண்கிறபோது புகழ்வான். அகன்றதும் விரும்பியபடி இகழ்வான். இவனே துர்மணமிக்க சாக்கடை நீரைப் போல் முழுமூச்சுடன் தவிர்க்க வேண்டும்.



CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

# शिवभारतशतकम् । (अनुवर्तते)

—डा. अभिराजराजेन्द्रमिश्रः, कुलपतिः (भूतपूर्वः) शिमला।

मन्दिरे च समीपस्थे राजराजविनिर्मिते।
इरावतीश्वराख्यं तत् लिङ्गमन्यद् विराजते ।। ३१

कुम्भघोषेश्वरं लिङ्गं कुम्मघोणाख्यमन्दिरे।
पौराणिकं स्थितं तत्र लोकश्रद्धाविकस्वरम् ।। ३२

तञ्जापुर्याश्च शैलाभे व्योमचुम्बिनि मन्दिरे।
लिङ्गं प्रतिष्ठितं भव्यं नाम्नैव बृहदीश्वरम् ।। ३३

लिङ्गराजाभिधं लिङ्गं लिङ्गराजाख्यमन्दिरे।
उत्कलेषु श्रियं धत्ते नगरे भुवनेश्वरे ।। ३४

लिङ्गं तदेकलिङ्गाख्यं सिसोदियाकुलाधिपैः।
समर्चितं स्थितं मार्गे चित्तौडस्य मनोरमम् ।। ३५

काशी शम्भुपुरी ख्याता तत्र शम्मुर्गृहे गृहे।
शम्भुदेवालयाः केचिन्महीयन्ते विशेषतः ।। ३६

मृत्युञ्जयो महादेवस्तत्र ख्याततमो मतः।
निविडे जनसम्मर्दे भक्तवाञ्छासुरद्रुमः ।। ३७

जागेश्वरमहादेवस्तथैव महिमान्वितः।
स्थापितश्श्रूयते जातु जैगीषव्यमहर्षिणा ।। ३८

नगरस्योत्तरे भागे लिङ्गं प्रद्मं विराजतेः।
गङ्गाधेनुमतीसन्धौ मार्कण्डेयेश्वराभिधम् ।। ३९


CC-0 In Public Domain. Digitization by Muthulakshmi Research Academy

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

भिलोचनो महादेवः स्थिता जौनपुराऽध्वनि ।
काशीतः पश्चिमे भागे दक्षिणे च सतीतटे ।। ४०

सईनाम्ना वहन्तीयं वाल्मीकिमुखवर्णिता ।
मन्यते यज्ञदग्धायाः सत्याः जलमयी तनुः ।। ४१

पदे-पदे तटे सत्यास्ततश्शम्भुः प्रियार्पितः ।
मन्दिरे दृश्यते स्नतो नित्यमेव प्रियाम्बुधिः ।। ४२

स्वतः प्रकटितं लिङ्गं तथैकं हि महीयते ।
श्रीकरशूलनाथाख्यं सतीवामतटान्वितम् ।। ४३

रामभक्तसुरेन्द्रेण पूजितमूर्ध्वरेतसा ।
पण्डितैरर्चितो नैकैर्मासेऽथ पुरुषोत्तमे ।। ४४

प्रणीतं यस्यं महाहात्म्यं त्रिवेणीकविनां पुनः ।
महीयस्याऽभिराज्या चाऽप्यतिरुद्रमखोऽर्पितः ।। ४५

सत्या दक्षिणे पुलिने प्राक्तनं शिवमन्दिरम् ।
स्थितं सागीपुरक्षेत्रे घुइँसरनाथसंज्ञकम् ।। ४६

अयं हि घुइसरश्शब्दो घुष्मेश्वरपदोद्भवः ।
प्रतीयते जनपदे प्रतापगढनामके ।। ४७

पँडिलामहादेवाख्यः कश्चिद्धि पाण्डवेश्वरः ।
शिवो विराजते ग्रामे पँडिलाख्ये प्रयागके ।। ४८

लाक्षागृहादविमुक्तैस्तैः साम्बपाण्डवबन्धुभिः ।
प्रतिष्ठापितमेतद्वै शिवलिङ्गमिति श्रुतम् ।। ४९



CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

सुजानगञ्जपार्श्वस्थं गौरीशङ्करमन्दिरम् ।
चिरकालात्प्रतिष्ठायाः परां काष्ठां समश्नुते ।। ५०

ख्यातं मणिमहेशाख्यं चम्बाजनपदे स्थितम् ।
हिमाचलप्रदेशे हि साक्षात् स्वर्गपदं स्मृतम् ।। ५१

कुल्लूजनपदे चापि राजते विद्युदीश्वरः ।
बिजलीमहादेवाख्यश्चित्रवृत्तान्तमण्डितः ।। ५२

अत्र विद्युन्निपातेन शिवलिङ्गं विखण्डितम् ।
नवनीतप्रयोगेण पुनस्संयोज्यतेऽर्चकैः ।। ५३

विपाशावामपुलिने गर्लीग्रामे प्रतिष्ठितम् ।
ख्यातं कालेश्वरं लिङ्गं देवभूमौ विराजयते ।। ५४

प्राच्यां दिशि हरि द्वारात् लोकवेदप्रतिष्ठितम् ।
नीलकण्ठेश्वरं लिङ्गं पौराणिकमिह स्थितम् ।। ५५

कालकूटोष्मणा तप्तो विश्रान्तोऽत्रैव शङ्करः ।
कथेयं श्रूयते काऽपि नीलकण्ठाश्रिताऽत्र हि ।। ५६

चूडेश्वरमहादेवः सिरमौराख्यमण्डले ।
हिमाचलप्रदेशे हि प्रख्यातोऽत्र विराजते ।। ५७

काश्मीरेऽमरनाथाख्यं शिवलिङ्गं न कैः श्रुतम् ।
निर्मीतये स्वयं यद्धि हिमबिन्दूच्चयैः शनैः ।। ५८

यमवेक्ष्य ध्रुवा मुक्तिस्तुङ्गनाथस्स गीयते ।
विवाहस्थलिका सेयं शैलजाशिवयोर्मता ।। ५९

(अनुवर्तते)


CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

# शब्दविमर्शः - भू धातोरनेकार्थकप्रयोगाः ।

--डा.वि.आर्. मनोजः, उपनिदेशकः, चिन्मयशोधसंस्थानम्

भू सत्तायाम् इत्ययं धातुः अनेकेष्वर्थेषु प्रयुक्तो दृश्यते । सत्तायामस्ति भवति विद्यते चेति भट्टमल्लगिरचितायाम् आख्यातचन्द्रिकायां सत्तावाचकानि क्रियापदानि उदाहृतानि । तेषु भवति इति भू धातुरूपमप्युदाहृतं वर्तते । ततोऽन्यत्रानेकेषु अर्थेषु अस्य धातोः प्रयोगाः दृश्यन्ते । यथा—

१. अनादरेऽर्थे परिभवति इति परिपूर्वकाद् भू सत्तायाम् इत्यस्माद्धातोः निष्पद्यते । अनादरः परिभवः परीभावस्तिरस्क्रिया । रीढावमाननावज्ञावहेलनमसूर्क्षणमित्यमरः । अस्यां वृणीष्व मनसा परिभाव्य कञ्चिद्यं चित्तवृत्तिरनुधावति तावकीना इति श्रीहर्षः ॥ (नैष. ११.८) ।

२. अभिभवेऽर्थे पराभावयति अभिभवतीति च प्रयुज्येते । पराभावयतीत्यत्र परापूर्वः भू धातुः हेतुमण्ण्यन्तः । अभिभवतीत्यत्र अभिपूर्वस्य प्रयोगः । अत्याकारः परिभवो निराकारश्च पराभवः । अनादरश्चाभिभवस्तिरस्कारश्च कथ्यते इति हलायुधः । अभिभवति मनः कदम्बवायौ मदमधुरे च शिखण्डिनां निनाद इति भारविः (किरा १०.२३) । उत्थानवानिह पराभवितुं तरस्वी शक्यः पुनर्भवति केन विरोधिनायमिति श्रीहर्षः (नैष. १३.१३) ।

३.आदरे सम्भावनायाञ्चार्थे सम्भावयति । सम्पूर्वोऽत्र भू धातुः ण्यन्तः । वेलानिलः केतकरेणुभिस्ते सम्भावयत्याननमाय-ताक्षि



CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

इति कालिदासः (रघु.१३.१६)।

४. कृतावर्थे भावयति इति भू धातोः ण्यन्ते प्रयोगः। कृतिः प्रयत्नः।

५. जन्मन्यर्थे उद्भवति इति प्रयोगः। उत्पूर्वोऽत्र भू धातुः। जनुर्जननजन्मानि जनिरुत्पत्तिरुद्भव इत्यमरः।

६. जन्मनि प्राप्तौ सम्पत्तौ आद्योपलम्भे पर्याप्तौ सामर्थ्ये चार्थेषु प्रभवति इति प्रयुज्यते। प्रपूर्वकोऽत्र भू धातुः। जनुर्जननजन्मानि जनिरुत्पत्तिरुद्भव इत्यमरः। कामं प्रकामं पर्याप्तं निकामेष्टं यथेप्सितमित्यमरः। कर्तुं यच्च प्रभवति महीमुच्छिलीन्ध्राम-वन्ध्यामिति कालिदासः (मेघ.१.११)। वल्मीकाग्रात्प्रभवति धनुष्खण्डमाखण्डलस्येति च कालिदासः (मेघ. १.१५)। तथायं माणिक्यस्फटिककनकग्रावशिखरैरशून्यात्मा सेतुः प्रभवति महानायक इवेति मुरारिः (अनर्घ. ७.१८)। बलवदपि वलं मिथोविरोधि प्रभवति नैव विपक्षनिर्जयायेति भारविः (किरा. १०.३७)। एतेषूदाहरणेषु यथासम्भवम् अर्थभेदान् विदाङ्कुर्वन्तु।

७. प्रत्यक्षेऽर्थे अनुभवति सति अनुपूर्वो भू धातुः प्रयुज्यते। अनुभवति हि मूर्ध्ना पादपस्तीव्रमुष्णमिति कालिदासः (शाकु. ५.७)। प्रत्यक्षं स्यादैन्द्रियकमित्यमरः। अक्षमिन्द्रिये। अतः श्रवणाघ्राणनाद्यर्थेष्वपि उदाहरणानि भवितुमर्हन्ति।

८. प्राकट्येऽर्थे व्युद्भवति। वि उत् इत्युपसर्गद्वयपूर्वः भू सत्तायाम् धातुः।

९. भङ्गेऽर्थे पराभवति सति परापूर्वस्य भू सत्तायाम् इति



CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

भ्वादिगणस्थस्य धातोः प्रयोगः । पराभवते इत्यत्र परापूर्वः भू प्राप्तावात्मनेपदी इति चुरादिः । 'आधृषाद्वा' (गणसूत्रम्) इति धृषधातुमभिव्याप्य विभाषितणिचो धातवः पठिताः । तत्रायं धातुः । तेन णिजभावे पराभवते इति प्रयोगः । णिचि पराभावयते ।

१०. शक्तिप्राप्त्योरर्थयोः विभवति प्रभवति इत्यनयोः प्रयोगः । विभवतीत्यत्र विपूर्वः भू सत्तायाम् । शक्ति पराक्रमप्राणौ इत्यमरः । कासूसामर्थ्ययोः शक्तिरित्यप्यमरः । कामायुष्टोमयज्वा शमितकुमुदिनीमौनमुद्रानुरागः शृङ्गाराद्वैतवादी विभवति भगवानेष पीयूषभानुरिति मुरारिः (अनर्घ.७.६२) । प्रभवतीत्यत्र प्रपूर्वः भू सत्तायाम् धातुः । उच्छेत्तुं प्रभवति यन्न सप्तसप्तिस्तन्नैशं तिमिरमपाकरोति चन्द्र इति कालिदासः (शाकु. ६.३०) ।

११. सत्तायामर्थे भवति इति प्रचुरं प्रयुज्यते । द्रव्यगुणकर्मवृत्तौ कालसम्बन्धेन विद्यमानतायाञ्च प्रयुज्यते । प्रायः सर्वो भवति करुणावृत्तिरार्द्रान्तरात्मेति कालिदासः (मेघ. २.३०) ।

१२. सिद्धौ सम्भवे माने साहित्ये चार्थे इति सम्पूर्वस्य भू धातोः प्रयोगः । सिद्धिः सम्प्राप्तिः । योग्यमृद्धः सिद्धिलक्ष्म्यौ इत्यमरः सिद्धे निर्वृत्तनिष्पन्नावित्यमरः । मानश्चित्तसमुन्नतिरित्यप्यमरः ।

१३. स्फूर्तावर्थे प्रादुर्भवति आविर्भवति इति च प्रयुज्येते । प्रासुस् आविस् इत्यव्यते । 'स्वरादिनिपातमव्ययम्' (१.१.३७) इत्यनेन सङ्गृहीतत्वात् । तमस्तपति घर्मांशौ कथमाविर्भविष्यतीति कालिदासः (शाकु.५.१४) ।

* * *



CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

# रघुवंशे द्वादशसर्गे द्वादशः श्लोकः

श्रुत्वा तथाविधं मृत्युं कैकेयीतनयः पितुः ।
मातुर्न केवलं स्वस्याः श्रियोऽप्यासीत् पराङ्मुखः ।।

पदच्छेदः :- श्रुत्वा तथाविधं मृत्युं कैकेयीतनयः पितुः मातुः न केवलं स्वस्याः श्रियः अपि आसीत् पराङ्मुखः । (१३ पदानि)

*शब्दधातुरूपाणि*

श्रुत्वा - त्वा.प्र.अव्य.

तथाविधं - विधं विधौ विधान् - अका.पु.द्वि.एक।

मृत्युं - मृत्युं मृत्यू मृत्यून्-उका.पुं.द्वि.एक।

कैकेयीतनयः - तनयः तनयौ तनयाः - अका.पुं.प्र.एक।

पितुः - पितुः पित्रोः पितॄणां - ऋका.पुं.ष.एक।

न, केवलं अपि - अव्य

स्वस्याः - स्वस्याः स्वयोः स्वासां - आका.स्त्री.ष.एक।

श्रियः - श्रियः श्रियोः श्रीणां श्रियां - ईका.स्त्री.ष.एक।

आसीत् - आसीत् आस्ताम् आसन् - 'अस भुवि'' धातोः लङि. प्र.पु.एक।

पराङ्मुखः - मुखः मुखौ मुखाः - अका.पुं.प्र.एक।

प्रतिपदार्थः - कैकेयीतनयः - கைகேயின் மகன் பரதன், पितुः - தந்தையின், तथाविधं - அத்தகைய; मृत्युं -



CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

மரணத்தை, श्रुत्वा - கேள்வியுற்று, स्वस्याः - தனது, मातुः केवलं - தாயிடம் மட்டும், पराङ्मुखः - வெறுப்புற்றவனாக; नासीत् - இருக்கவில்லை. श्रियः अपि - ராஜ்ய செல்வத்தினிடமும்; पराङ्मुखो भवत् - வெறுப்புற்றவனான்.

व्याकरणविशेषः—

कैकेयीतनयः - कैकेय्याः तनयः

पराङ्मुखः - पराक् मुखं यस्य सः

कोषः

आत्मजः तनयः सूनुः

विधा विधौ प्रकारे च

भावार्थः - स्वमातृमूलकं स्वपितृमरणं श्रुत्वा भृशं खिन्नः भरतः मातुः तथा तद्द्वारा प्राप्तात् राज्याच्च जुगुप्सामास ।।

—*—

त्रयोदशः श्लोकः

ससैन्यश्चान्वगाद्रामं दर्शितानाश्रमालयैः ।
तस्य पश्यन् ससौमित्रेरुदश्रुर्वसतिद्रुमान् ।।

पदच्छेदः :- ससैन्यः च अन्वगात् रामं दर्शितान् आश्रमालयैः तस्य पश्यन् ससौमित्रेः उदश्रुः वसतिद्रुमान् ।
(११ पदानि)



CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

**शब्दधातुरूपाणि**

ससैन्यः - ससैन्यः सैन्यौ सैन्याः - अका.पुं.प्र.एक. ।

च - अव्य

अन्वगात् - अगात् अगातां अगुः 'गम्लृ गतौ' धातोः (अनु. इत्यपसर्गपूर्वक) लुङ्-प्र.पु.एक ।

रामं - रामं रामौ रामान् - अका.पुं.द्वि.एक ।

दर्शितान् - दर्शितं दर्शितौ दर्शितान् - अका.पुं.द्वि.बहु ।

आश्रमालयैः - आलयेन आलयाभ्यां आलयैः - अका.पुं.तृ.बहु।

तस्य - तस्य तयोः तेषां - दका.पुं.ष.एक ।

ससौमित्रेः - ससौमित्रेः ससौमित्र्योः सौमित्रीणां - इका.पुं.ष.एक ।

उदश्रुः - अश्रुः अश्रू अश्रवः - उका.पुं.प्र.एक ।

वसतिद्रुमान् - द्रुमं द्रुमं द्रमान् - अका.पुं.द्वि.बहु ।

प्रतिपदार्थः - ससैन्यः - சேனையுடன் கூடிய பரதன், आश्रमालयैः - ஆசிரம வாஸிகளான முனிவர்களால், दर्शितान् - காண்பிக்கப்பட்ட, ससौमित्रेः - இலக்குமணனுடன் கூடிய, ராமரது; वसतिद्रुमान् - வாஸஸ்தானமான மரங்களை; पश्यन् - பார்த்துக்கொண்டு, उदश्रुः - கண்ணீருடன்; रामं - ராமரை; अन्वगात् - பின் தொடர்ந்தான்.



CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

**व्याकरणविश्लेषः**

**ससैन्यः** - सैन्येन सहितः

**आश्रमालयैः** - आश्रम एव आलयः येषां ते। तैः।

**ससौमित्रेः** - सुमित्रायाः अपत्यं पुमान् सौमित्रिः
सौमित्रिणा सहितः ससौमित्रिः। तस्य

**उदश्रु** - उद्गतानि अश्रूणि यस्य सः।

**कोषः** - 'निकाय्यनिलयायलयाः'

दृगृदृष्टी चास्रु नेत्राम्बु रोदनं चास्रमश्रु च' 'वसती रात्रिवेश्मनोः'

**भावार्थः :—**

ततः पितुः उत्तरक्रियादिकं विधाय राममानेतुं प्रस्थितः भरतः वनं प्रविष्टः आश्रमौकैः मुनिभिः प्रदर्शितान् रामस्य निवासवृक्षान् विलोक्य राज्यभोगार्हस्य वनविहारत्वं चिन्तयन् अस्तम्भितनेत्राम्बुः राममार्गम् अन्वसरत्॥

—*र. रङ्गनाथशर्मा सं.वि.स. - काञ्चीपुरम्*

अपकार सहस्रेषु स्वकीयेषु परेषु वा।
अमीक्ष्यकारिभिः सद्भिः क्रूरः क्रोधो निगृह्यते॥

*தம்மவரோ பிறரோ தீங்கிழைத்திருந்தாலும் பொறுத்து ஆராய்ந்து செயல் புரிகிற நல்லோர் அவர்களிடம் காட்ட வேண்டிய கோபத்தை அடக்கிக் கொள்வர்.*



CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

# बालबोधः ।

—प्रचार्यः. डा. विष्णुपोत्तिः, SCSVMV, कुलपतिः, काञ्चीपुरम्।

सर्वा सर्वे च सर्वाश्च सर्वया तदनन्तरम्।
सर्वाभ्यां च सर्वाभिश्च सर्वस्यै तदनन्तरम्॥ १०५

सर्वाभ्याश्च पुनस्तद्वत् सर्वाभ्यस्तदनन्तरम्।
सर्वस्याः पञ्चमी चैवं चतुर्थी द्विवचने यथा॥ १०६

बहुत्वे च तथा रूपं सर्वस्याः इति षष्ठ्यपि।
सर्वयोश्चैवं सर्वासां सर्वस्यां तदनन्तरम्॥ १०७

सर्वयोरथ सर्वासु सर्वशब्दो निगद्यते।
सर्वासु च तथा रूपैः विभक्तिषु बुधैः क्रमात्॥ १०८

सर्वं सर्वे च सर्वाणि सर्वं सर्वे तथैव च।
शेषं पुंवच्च रूपाणि विज्ञेयानि क्रमादिह॥ १०९

एवमेव च विज्ञेयाः शब्दाः विश्वादयः क्रमात्।
विश्वो विश्वौ पुमान् विश्वे विश्वा विश्वे च योषिति॥ ११०

विश्वं विश्वे च विश्वानि क्लीबरूपाणि चिन्तय।
अहमावां वयञ्चेति मामावां तदनन्तरम्॥ १११

अस्मान् मया च आवाभ्या मस्माभिस्तदनन्तरम्।
मह्यमावाभ्यामस्मभ्यं मदावाभ्यामथ क्रमात्॥ ११२

अस्मान्मम च तत्पश्चात् आवयोरपि चिन्तय।
अस्माकं मयि चेत्येव मावयोस्त्वेवमस्मास्वपि॥ ११३



CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

द्वियायान्तु मा नौ नः चतुर्थ्यामपि ते तथा।
नौ च नश्च तथा मे च षष्ठ्यां नौ च च नस्तथा ।। ११४

त्वं युवां यूयमित्येवं त्वान्त्वा युवाञ्च वांच च।
युष्मानेवञ्च वश्चेति त्वया चैवं ततः परम् ।। ११५

युवाभ्यामिति युष्माभिः तुभ्यं ते च ततः परम्।
युवाभ्यां वाञ्च युष्मभ्यम् वश्चेति त्वच्च चेत्यपि ।। ११६

युवाभ्यां युष्मदित्येवं तव ते युवयोश्च वाम्।
युष्माकं वश्च चेत्येवं त्वयि च युवयोस्तथा ।। ११७

युष्मास्वथ च रूपाणि युष्मच्छब्दस्य चिन्तय।
भवानिति भवन्तौ च भवन्तस्तदनन्तरम् ।। ११८

भवन्तञ्च भवन्तौ च भवतस्तदनन्तरम्।
भवता च भवद्भ्याञ्च भवद्भ्यश्च ततः परम् ।। ११९

भवते च भवद्भ्याञ्च भवद्भ्यस्तदनन्तरम्।
भवतश्च भवद्भ्याञ्च भवद्भ्यश्च ततः परम् ।। १२०

भवतो भवतोश्चैवं भवतां तदनन्तरम्।
भवति भवतोश्चैवं भवत्सु चेति हे भवन् ।। १२१

भवच्छब्दस्य रूपाणि प्रथितानि तथा नरे।
भवती च भवत्यौ च भवत्यश्च स्त्रियामथ ।। १२२

भवच्च भवती चैवं भवन्ती च भवन्ति च।
रूपाणि क्लीबलिङ्गानि शेषं पुंवच्च चिन्तय ।। १२३

सश्च तौ च तथा ते च तं तौ तान् तेन चेत्यपि।
ताभ्यां तैश्च तथा तस्मै ताभ्यां तेभ्यस्तथैव च ।। १२४ (अनुवर्तते)



CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

# करुणामृतम् ।

(श्रीगुरुवायुपुरेशवैभवम्) अनुवर्तते

—तामरश्शेरि शङ्करन् भट्टतिरिः ॥

त्वामन्तरा जगति जेतुमनल्पदोषां
मायां विरिञ्चहरशङ्करकर्मनेत्रीम् ।
शक्तोऽस्ति कस्तदयि नाथ ! समुद्धरेमं
तस्यास्सुदुस्तर - विचित्रमहेन्द्रजालात् ॥ १

दृष्टं जगत् त्वमसि सर्वविकाराजातः
त्वत्तो भवन्ति कलशादि मृदो यथा हि ।
त्वय्यर्पयन्ति तत एव मनो वचांसि
सिद्धा, यतश्च्युतिभयं न कदाऽपि तेषाम् ॥ २

श्रीकृष्ण ! तावकचरित्रसुधाप्लुतानां
नास्ति प्रपञ्चविषयोत्थिततापलेशः ।
का वा कथा पुनरुपार्जिततत्त्वबोध-
शुद्धात्मनां शरणमीश्वर ! तादृशोऽसि ! ॥ ३

श्वासानिलज्वलितजाठरवह्नितप्ताः
जीवन्ति केचन नरा इतिवच्चलन्तः ।
एतेन किं फलमविश्रमकर्मभाजां
तेषां त्वदीयभजनेन हि जन्म सार्थम् ॥ ४

वातालयेश्वर ! यथार्हमुपासते त्वां
अन्तःस्थितं बहुजनास्सफलाश्च सर्वे ।
ये तत्र शीर्षकमलोल्लसितं भजन्ति
तेषां न संभवति मृत्युभयं कदाऽपि ॥ ५



CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

सर्वेषु कार्यनिवहेषु विराजसि त्वम्,
एकोप्युपाधिपरिकल्पितभिन्नरूपः ।
तं त्वां भजन्ति जगदीश्वर ! वीतरागाः
सत्यं विकाररहितं गुणसङ्गमुक्तम् ।। ६

कृष्ण ! त्वदीयचरितामृतमाश्रयन्तः
स्वर्गादिसौख्यमपवर्गमपि त्यजन्तः ।
अन्योपकारनिरताश्च जयन्ति सन्तः
तत्सङ्गतो भवतु मे भवसम्भ्रमान्तः ।। ७

एकैकमप्यवितुमीश्वर ! दीनजीवं
संसारतस्सदयमाह्वयसे तथाऽपि ।
नायाति हन्त निकटं तव भाग्यहीन;
सङ्कीर्णवैषयिकतुच्छरसे विलीनः ।।

ध्यानं त्वदीयमखिलेश्वर ! कामवैर-
भक्त्यादिसाधितमशेषमनन्तरायम् ।
त्वत्प्रापकं भवति, तत्र ममास्तु भक्ति-
सम्पूरितं तदिति, सादरमर्थये त्वाम् ।। ८

ब्रह्मादयस्सुरगणास्तव पूर्णतत्त्वं
जानन्ति नाप्यवरजाः कथया परेषाम् ।
किं स्याल्लये सदसदादि न विद्यते हि
त्वज्ज्ञापकं शरणमस्ति तवैकभक्तिः ।। ९

ज्ञानं तवेश्वर ! विभिन्नमतैरसाध्यं
वैशेषिकादिभिरतिभ्रमयुक्तिवादैः ।



CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

त्वय्यस्तु भक्तिरवबोधरसे परात्म-
न्यस्पृष्टमायिकगुणे यत एव मुक्तिः ॥ ११

भूषासु काञ्चनमिवासि जगत्यशेषे
सत्त्वात्तवेद मसदप्यवभाति सत्यम् ।
विश्वस्वरूपमत एव भजन्ति विज्ञाः
त्वां तादृशं भयहरं शरणं प्रपद्ये ॥ १२

ये त्वां भजन्त्याखिलभूतनिवासिनं ते
मृत्युं तरन्ति, विमुखास्तु वचोनिबद्धाः ।
भ्राम्यन्ति हा ! पशुसमाः प्रथमोदितानां
भक्त्या पुनीतजगतां गतिरेव काम्या ॥ १३ (अनुवर्तते)

*जीवनं वृथा !:*

*ह्यस्तन उदयोऽद्यतनं पतनम् जीवनं वृथा बुद्बुदोपमम् ।*
*संशये सदा यात्राऽऽरब्धा कीर्तिः कौलीनैः सन्दब्धा ।*
*प्रत्यूहैर्निंचितमभूद्यतनम् जीवनं वृथा बुद्बुदोपमम् ॥*

*एकाकि नागतं कापि सुखम् ध्रुवमानिनाय किञ्चिदुःखम्*
*विषबिन्दुच्छुरितं यथाऽमृतम् जीवनं वृथा बुद्बुदोपमम् ॥*

*स्वच्छायाऽपि न विश्वस्ताऽभूत् सह दिनमणिना साऽप्यस्ताऽभूत् ।*
*घनतमसि कल्पितं वृथाऽटनम् जीवनं वृथा बुद्बुदोपमम् ॥*

*उत्कोच इवाऽहं सञ्जातः स्वार्थान्धकरे सायं प्रातः ।*
*तुल्यं मम कृते गृहं विजनम् वृथा बुद्बुदोपमम् ॥*


CC-0. In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

# मुक्तकमौक्तिकानि ।

—श्रीसुन्दरराजः, I.A.S. (Retd.) भुवनेश्वरम् ।

*हे दुर्योधन दुर्मते नृपपदे त्रातुं स न त्वाऽशकत्*

हे दुर्योधन दुर्मते नृपपदे त्वत्कोऽभिषिवतोंऽगराट्
कर्णः प्राणसुहृत् वरास्त्रशरभृत् त्रातुं स न त्वाऽशकत् ।
वस्वंशस्स्थविरस्स भीष्म नृपति द्रोणश्च रुद्रांशवान्
रुद्राल्लब्धकृपाण एष कृपणो द्रोणिर्वदुर्निर्दयः ।।

*नाथाव मत्पापमचिन्तयित्वा*

अधोगतिं चोर्ध्वगतिं च पुंसां त्वमेव दाश्वानिति सोऽस्मि विद्वान् ।
अनाथमत्रागतमग्रतस्ते नाथाव मत्पापमचिन्तयित्वा ।।

त्वन्नामगानानन्नरकोऽपि नाको जानामि नूनं भविता तथाऽपि ।
बिभेमि वस्तुं नरके ह्यनाथो नाथाव मत्पापमन्तयित्वा ।।

न बिभ्यदासीत् नरकेऽपि वस्तुं नित्य स्मरंस्त्वां कुलशेकरस्सः ।
अहं प्रपन्नोपि न दृप्त एवं नाथाव मत्पापमचिन्तयित्वा ।।ख

प्रपन्नकूटस्थ परांकुशो यस्सहस्रगाथा इह गायति स्म ।
बिभेति नानानरकात् स यद्वत् नाथाव मत्पापमचिन्तयित्वा ।।

नक्रस्य वक्त्रात् स तु भीतभीतः त्वामेव यातश्शरणं गजेन्द्रः ।
यद्वत् प्रपन्नोऽस्मि तथैव चाहं नाथाव मत्पापमचिन्तयित्वा ।।

नारायणायेति नमस्स उक्त्वा मन्त्रं प्रपन्नः परकालसूरिः ।
मन्त्रं तमेवासकृदुच्चरन्तं नाथाव मत्पापमचिन्तयित्वा ।।



CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

कृष्णं सभायां कौरवाणां स्वां बिभ्यतीं तत्र हि मानहानिं ।
दुकूलदानेन ररक्षिथ त्वं नाथाव मत्पापमचिन्तयित्वा ।।

अचिन्तयित्वा मम पापमेव पितामहं नाथमुनिं विलोक्य ।
पातुं यथोवाच स यामुनार्यः नाथाव मत्पापमचिन्तयित्वा ।।

रामानुजार्यः स्वयमब्रवीत् प्राक् त्वां स्वं प्रपन्नानवितुं ययाचे ।
दासः प्रपन्नश्च हि दासदासः नाथाव मत्पापमचिन्तयित्वा ।।

अचार्य रामानुज भागिनेय वंश्यः शिशुर्वेङ्कटशेषजस्य ।
पुत्रः कवेः श्रीनिधिराघवस्य नाथाव मत्पापमचिन्तयित्वा ।।

पर इह न कश्चित् सुहृदपि

पुरा जन्मन्येको भवति तव पुत्रस्सुहृदपि
पिता भ्राता शत्रुः परमिह परस्मिन् पुनरिमे ।

प्रतीपा जायन्ते कृतमविदो वा कृतविदो
भवे भ्राम्यत्यस्मिन् पर इह न कश्चित् सुहृदपि ।।

कृतज्ञो नामैको भवति भगवान् यस्तव सुहृत्

तटस्था वर्तन्ते कति च बहवोऽरातय इतः
जले मत्स्या यद्वत् तव पदतुदो मत्सरपराः ।

कृतघ्नानां मध्ये न भवति कृतज्ञः क्वचिदपि ।
कृतज्ञो नामैको भवति भगवान् यस्तव सुहृत् ।।

अहंभावं मा गा अहमिति पुमान् पुंस्त्वपरुषः

अहंभावं मा गा अहमिति पुमान् पुंस्त्वपरुषः
स्त्रिया मातुः कुक्षेस्त्वमसि जनितस्तत्स्तनपिबः । *(अनुवर्तते)*


CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

# Sanskrit Prosody

Metress with 13 Syllables in quarter.

## (अतिजगती).

### (१) कलहंस

(Also called सिंहनाद and कुटजा)

Def. सजसाः सगौ च कथितः कलहंसः ।

Sch.G. स,ज,स,स,ग (६,७)

Ex. यमुनाविहारकुतुके कलहंसो
व्रजकामिनीकमलिनीकृतकेलिः ।
जनचित्तहारिकलकण्ठनिनादः
प्रमदं तनोतु तव नन्दतनूजः ॥ See si.7.73.

### (2) क्षमा

(Also called चन्द्रिका and उत्पलिनी)

Def. तुरगरसयतिर्नौ ततौ गः क्षमा ।

Sch.G. न,न,त,त,ग (७,६)

Ex. इह दुरधिगमैः किंचिदेवागमैः
सततमसुतरं वर्णयंत्यन्तरम् ।
अमुमतिविपिनं वेददिग्व्यापिनं
पुरुषमेव परं पद्मयोनिः परम् ॥ Ki.5,18

### (3) प्रहर्षिणी.

Def. त्र्याशाभिर्मनजरगाः प्रहर्षिणीयम् ।

Sch.G. म,न,ज,र,ग (३,१०)

Ex. ते रेखाध्वजकुलिशातपत्रचिह्नं
सम्राजश्चरणयुगं प्रसादलभ्यम् ।



CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

प्रस्थानप्रणतिभिरङ्गुलीषु चक्र-
प्रस्थानप्रणतिभिरङ्गुलीषु चक्र-
मौलिस्रक्च्युतमकरन्दरेणुगौरम् ।। . 4.88

See K. 7, Si.8

## (४) मञ्जुभाषिणी

(Also called सुनन्दिनी and प्रबोधिता)

Def. सजसा जगौ च यदि मञ्जुभाषिणी ।

Sch. स,ज,स,ज,ग (६,७)

Ex. यमुनामतीतमथ शुश्रुवानमुं
तपसस्तनूज इति नाधुनोच्यते ।
स यदाऽचलन्निजपुरादहर्निशं
नृपतेस्तदादि समचारि वार्तया ।। Si. 13

## (5) मत्तमयूरी.

Def. वेदैरन्ध्रैर्मतौ यसगा मत्तमयूरः ।

Sch.G. म,त,य,स,ग (४.९)

Ex. दृष्ट्वा दृश्यान्याचरणीयानि विधाय
प्रेक्षाकारी याति पदं मुक्तमपायैः ।
सम्यग्दृष्टिस्तस्य परं पश्यति यस्त्वां
यश्चोपास्ते साधु विधेयं स विधत्ते ।। Ki.18

Si. 4.44, 9.76, also R. 9.75

## (6) रुचिरा.

(Also called प्रभावती)

जभौ सजौ गिति रुचिरा चतुर्ग्रहैः ।
ज, भ, स, ज, ग (४.९)


CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

कदा मुखं वरतनु कारणादृते
तवागतं क्षणमपि कोपपात्रताम् ।
अपर्वणि ग्रहकलुषेन्दुमण्डला
विभावरी कथय कथं भविष्यति ॥ M. 4.13

See Bk. 1.1. Si. 17

----*-----

Metress with 14 Syllables in quarter.

## (शकरी).

### (१) अपराजिता.

Def. ननरसलघुगैः वरैरपराजिता ।

Sch.G. न,न,र,स,ल,ग (७.७.)

Ex. यदनवधि भुजप्रतापकृतास्पदा
यदुनिचयचमूः परैरपराजिता
व्यजयत समरे समस्तरिपुव्रजं
न जयति जगतां जगतिंरुडध्वजः ॥

### (२) असंबाधा.

Def. म्तो न्सौ गावक्षग्रहविरतिसंबाधा।

Sch.G. म,त,न,स,ग,ग (५.९)

Ex. वीर्याग्नौ येन ज्वलति रणवशात्क्षिप्ते
दैत्येन्द्रे जाता धरणिरियमसंबाधा ।
धर्मस्थित्यर्थं प्रकटिततनुसंबंधः
साधूनां बाधां प्रशमयतु स कंसारिः ॥



CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

## (३) पथ्या.

(Also called मञ्जरी)

Def. सजसा यलौ च सह गेन पथ्या मता ।

Sch.G. स,ज,स,य,ल,ग (५.९)

Ex. स्थगयन्त्यमूः शमितछात्रकार्तस्वराः ।
जलदास्तडित्तुलितकान्तकार्तस्वराः ।
जगतीरिह स्फुरितचारुरुचाभीकराः
सवितुः क्वचित्कपिशयन्ति चामी कराः ॥
Si.4.24

## (4) प्रमदा.

(Also called कुररीरुता).

Def. नजमजला गुरुश्च भवति प्रमदा ।

Sch.G. न,ज,म,ज,ल,ग (६.८)

Ex. अनतिचिरोज्झितस्य जलदेवचिर-
स्थितबहुबुद्बुदस्य पयसोऽनुकृतिम् ।
विरलविकीर्णवज्रशकला सकला-
मिह विदधाति धौतकलधौतमती ॥ Si.4.4)

## (5) प्रहरणकलिका.

Def. ननभनलगिति प्रहरणकलिका ।

Sch.G. न,न,भ,न,ल,ग (७.७).

Ex. व्यथयति कुसुमप्रहरणकलिका
प्रमदवनभवा तव धनुषि तथा ।
विरहविपदि से शरणमिह ततो


CC-0. In Public Domain. Digitization by Muthulakshmi Research Academy.

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

मधुमथनगुणस्मरणमविरतम् ॥

(६) मध्यक्षमा.

(Also called हंसश्येनी or कुटिल).

Def. मध्यक्षामा युगदशविरमा म्भौ न्यौ गौ ।

Sch.G. म,भ,न,य,ग,ग (४.१०)

Ex. नीतोच्छ्रायं मुहुरशिशिररश्मैरुशै-
रानीलाभैर्विरचितपरभागा रत्नैः ।
ज्योत्स्नाशङ्कामिह वितरति हंसश्येनी
मध्येप्यह्नः स्फटिकरजतभित्तिच्छाय ॥ Ki.5.31.

(7) वसन्ततिलका

(Also called वसन्ततिलका.
उद्धर्षिणी, सिंहोन्नता).

Def. उक्ता वसन्ततिलका तभजाः जगौ गः ।

Sch.G. त,भ,ज,ज,ग,ग (८.६)

Ex. यात्येकतोऽस्तशिखरं पतिरोषधीना-
माविष्कृतारुणपुरःसर एकतोऽर्कः ।
तेजोद्वयस्य युगपद् व्यसननोदयाभ्यां
लोके नियम्यत इवात्मदशान्तरेषु ॥ S.4.1.

(8) वासन्ती.

Def. मात्तो नो मो गौ यदि गदिता वासन्तीयम् ।

Sch.G. म,त,न,म,ग,ग (४.६.४)

Ex. भ्राम्यद्भृगीनिर्भरमधुरालापोद्गीतैः
श्रीखण्डाद्रेरुद्तपवनैर्मदान्दोला ।
लीलालोला पल्लवविलसद्धस्तोल्लासैः



CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

ஈ காராந்த ஶப்தா:

| | | | | |
|---|---|---|---|---|
| 1. | வராஹீ | ஹாரீதீ | ஶாலிநீ | ஶாரதீ |
| 2. | வரதீவீ | ஜாஹ்நவீ | ஶஶிஜ்வீ | ஸதீ |
| 3. | உதீவீ | ஸதுவதீ | ஶிவாரிணீ | ஸாவ்வீ |
| 4. | சாமுண்டீ | தீபாவலீ | சாகிநீ | ஶாஶ்வதீ |
| 5. | சாயவீ | காவெரீ | ஶாகிநீ | ஶுக்ரணீ |
| 6. | ஸுவவாணீ | கூசாரீ | சாஹஶ்வரீ | கௌளஜாதீ |
| 7. | தூஜாநீ | சாநிநீ | லக்ஷ்மீ: | ஹாரிநீ |
| 8. | ஹவாநீ | ஶாக்ஷஸீ | ஹிநீவாலீ | ஜெவலிநீ |
| 9. | ஶுசாணீ | யீவரீ | ஶாலீலீ | நாரீ |
| 10. | காத்யாயநீ | ஶுணவதீ | ஶாம்ஹவீ | ஸீதிநீ |



CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

உகாரமாக மஞ்சா:

டோநாத்ர விதொம்: பஹ்வ்ம்: பஜ்ர் வடி: கூரொத்ர வதத்ர ஹரத்ர தநொத்ர ஹவத்ர தம்: காம்: சாம்: ஊம் வைராஹ்ம்:

யவாம்ஹ்: சஜ்ர்: வய்ர்: ஸ்வஸ்ர்: ஸரய்ர்: கூண்ஜ்ர்: ஸ்வயம்ஹ்ர்: வஹவ்ர்: ஹ்ரிஹ்ர்: ஸோஹ்ர்:

ளகாரமாக மஞ்சா:

டீஜாந்ர ஸ்ரீஜாந்ர டோஜாந்ர கெத்ஜாந்ர ஹநோஜாந்ர டமஷ்வாந்ர டயஷ்வாந்ர ஹாநோஜாந்ர டாத்ஜாந்ர ஹமவாந்ர



CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

கெத தீவெண தவஹா வதயுக்ஷீகூ்து வெயதழ॥

வவிரெ ச வாநிஷ்டாநஷ்டாஹ்ரீதவஷ்டவாக ।

ராவணொ ஜாந்ஷாஉநெ்யாவய்யுகும் தயா வ்ணொக ।

விஹீஷணொ விஷ்ணுஹக்திம் வவெ ஸகூ ம்ணாந்வித: ॥

நிஉெுவக்யா நிஹ்ரம் கூ்ஹுகுணெுா வ்ணீத ச ॥

கெஹ்ய வனதாந்து வாநுக்வா தஜ்ஞெவாக்யயுயெ விஹ்ம: ॥

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

## ஹரிவிஷ்ணு ஸஹஸ்ரநாம விவேக !

धर्मक्षेत्रे कुरुक्षेत्रे समवेता युयुत्सवः ।

मामका; पाण्डवाश्चैव किमकुर्वत सञ्जय ।।

सत्यं वद । धर्मं चर ।

आचार्यदेवो भव ।

अतिथि देवो भव ।

यान्यनवद्यानि कर्माणि

तानि सेवितव्यानि ।

सत्वमात्मेप्सा शरीरं च त्रयमेतत् त्रिदण्डिवत् ।

लोकस्तिष्ठति संयोगात् तत्र सर्वं प्रतिष्ठितम् ।।

स पुमांश्चेतनं तच्च तच्चाधिकरणं स्मृतम् ।

वेदस्यास्य तदर्थं हि वेदोऽयं संप्रकाशितः ।।

क्षणशः कणशश्चैव विद्यामर्थं च साधयेत् ।

क्षणत्यागे-कुतो विद्या कणत्यागे कुतो धनम् ।।

(अनुवर्तते)



CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

# रामाष्टपदी

(Sri P.R. Kannan, Bombay)

श्लो ॥ सीतां मार्गितु-मुद्यतेषु कपिषु प्रोल्लङ्घ्य वारांनिधिं
लङ्कायां परितो विचित्य हनुमान-त्यन्त-चिन्ताकुलः ।
दीना-मैक्षत राक्षसीभि-रभित-स्संरक्षितां शिंशुपा-
मूले देहविसर्जन-व्यवसितां देवीं स्मरन्तीं पतिम् ॥

Slokas

Of the monkeys planning to cross the ocean, Hanuman succeeded and searched for Sita in Lanka all around with great anxiety (in not finding her). He then saw Sita Devi at the foot of Simsupa tree surrounded by Rakshasis; Sita was in a pitiable condition and, thinking of her husband, she tried to drop her body.

रावण-मन्दिर-निहितां राघव-रहितां जगत्त्रयी-महिताम् ।
अतिसाहस-सन्निहितां जनकेन्द्र-सुता-मुवाच पवनसुतः ॥

Hanuman, the son of Vayu, spoke these words to Sita, the daughter of king Janaka, who was kept by force in the territory of Ravana, separated from Raghava, honoured in all the three worlds and possessed of great courage.

***In this fifteenth Ashtapadi, Tara's very clever entreaties to Lakshmana are steeped in 'Karuna'***


CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

rasa. She assures Lakshmana of the firm intent of Sugriva to seek out Sita, but at the same time she **draws his attention to Sugriva's monkey nature and** weakness. The poet moves on to Sundarakandam **and briefly touches upon Hanuman's tenacious** search for Sita. Hanuman addresses Sita in the toughest circumstance when she was attempting to commit suicide.

* * * *

## ॥ षोडशाष्टपदी ॥

(हरिरभिसरति इतिवत्)

## ASHTAPADI 16

(Like in Harirabhisarathi)

यदुकुलकांभोजिरागेण]
[आदितालेन गीयते

Raga Yadukula kambhoji]
[Tala Adi

तव पति-रनुजेन विजयते कुशली
त्वामाह कुशलं त्वयि प्रेमशाली ।
राघवे सर्वथा कुरु मा विषादमये ॥ (राघवे)

O Sita! Your husband, along with his younger brother, is well and is full of love for you; he enquires about your welfare. Do not grieve for him at all.



CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

एष्यति रघुपतिरिह सेना-रजसा
मम वचन श्रवणा-दनुतरसा ॥ (रा)

Rama will come here with a large army very quickly as soon as he hears my words (of your being found here).

निन्दति निजमपि बहुधा शरीरं तव
विरहे गुरुमिव भूमिभारम् ॥ (रा)

Owing to separation from you, Rama detests his own body very much and finds life on earth unbearably heavy.

नाश्नाति न पिबति न च याति निद्रां
ध्यायति भवतीं सदा हृदि भद्राम् ॥ (रा)

Rama does not take food or drink, nor does he sleep, thinking always of you, the auspicious consort, in his heart.

तं च मशक-कीटमपि देवि नाङ्गे
रामोऽपनयति विरह विवशोऽन्तरङ्गे ॥ (रा)

Rama does not even drive away mosquitoes and worms from his limbs owing to grief of separation gnawing at his heart.

त्वन्मय-हृदयेन दिशि दिशि भवती-
मवलोक्या-नुलभ्य शुचं याति महतीम् ॥ (रा)

With his heart entirely occupied by you, Rama looks for you in all directions and, not finding you, he is very grieved.


CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

'Hi- Energy' Silver Zinc
Nickel Cadmium Cells

## UNIQUE FEATURES

High Energy Density * Capability of very High rate discharge * Long life * Economical * Extremely Rugged * Wide Range

For further details please contact / write to:

**High Energy Batteries (India) Limited**
(FORMERLY SIMCO METTERS LTD. BATTERY DIVISION)
MATHUR - 622 515
(PUDUKKOTTAI DISTRICT)
*Regd. Office:*
House, Perungudi, Chennai - 600 096

*With best Compliments*

**SRI S.V. PARASURAMAN**
*(Proprietor)*

**RAM ENTERPRISES**
Mylapore, Chennai - 4

**Dealer :**

***Hindustan Petrolium Corporation Ltd.***



CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai
Date of Publication : 10th of every month
REGISTERED Registration No. TN / CC (S) DN / 443 / 15 - 17
TN / PMG (CCR) / WPP 696 / 15 - 17
Registration with Registrar News Paper of India 30478 / 77
SAMSKRITASRI

*With best compliments from :*

**LITEROOF**

(Poineers in Manufacture of Asphaltic Corrugated & Plain Roofing Sheets)

**NEW TUF-10 SER**

(Janatha - Deluxe - Expodel Expo - 10

**LITEROOF**

IS

(Economical * Flexible * Durable * Weather Proof

* Fire-Resistant

**LITEROOF**

FOR

*Factories - Theatres * Schools * Housing * Poultry *

Dairy Farms etc.,

**LR**

**LIGHT ROOFINGS LIMITED**

No. 35, 7th Street, V.S.I. Estate Phase II,
Thiruvanmiyur, Chennai - 600 041
Phone : 2454 4949 * 2454 4950

Printed by : Zigma Graphics, 9/1, Thirtharappan Street, Triplicane-5
Edited and Published by Sri S. Srinivasa Sarma on behalf of the Samskrit Education Society (Regd.)
Old 212/13-1, New No.11, St. Mary's Road, R.A. Puram, Chennai - 600 028.



CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,